**International Journal of Research in Social Sciences**
Vol.9 Issue 12, December 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# संज्ञाचतुष्ट्वं प्रादीनाम्

डॉ. कैलासचन्द्रदाशः

सहायकाचार्यः

पदानां चत्वारो भेदा मन्त्रव्याख्यातृभिः महाभाष्यकारपतञ्जलिभिरपि राद्धान्तोऽयमङ्गीकृतम् । उक्तं हि -चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति[i] । वेदनिरुक्तयोरपि चत्वारि वाक् परिमिता पदानि" (ऋग्वेद १-१६४-४५, यास्को निरुक्तम् १३-९. परिशिष्टः) इति। तत्र यदि नामाख्याते वाक्ये स्वातन्त्र्येण पृथक् प्रयोगा साक्षादर्थवाचके च स्तः, तर्हि निपातोपसर्गौसदा परतन्त्रौ[ii]" साक्षादर्थावाचकौ द्योतकौ च स्तः । एतौ खलु नित्यं नामाख्यातयोर्विशेषणरूपेणैव प्रयुज्येते । अनयोः खलु निपातोपसर्गयोर्मिथः पार्थक्यबीजं यथा निपातो नामाख्याते उभेऽपि विशिनष्टि, परमुपसर्ग आख्यातमात्रमेव।

पदानामुपर्युक्तां प्रकारचतुष्टयीमतिरिच्य कर्मप्रवचनीयाख्यं पञ्चममपि प्रकारं कतिपये वैयाकरणा आमनन्ति । वस्तुतस्तु प्रादयो द्वाविंशतिः शब्दा एव निपातोपसर्गगतिकर्मप्रवचनीयनामभिरापाणिनेरभिधीयन्ते, अतोऽतिरिक्तप्रकारस्यौचित्यं शब्दभेदे सर्वथैवासंगतम् । तत्रेदं वैशिष्ट्यं यथा एनान् द्वाविंशतिं शब्दान् अतिरिच्य चादिगणपठितान् सार्धशताधिकान् शब्दानपि बुधा निपातसंज्ञाकानेव मन्वते।[iii]" तेषां समेषामपि निपातसंज्ञकशब्दानामनेकेऽर्थाः व्याकरणशास्त्रकोशादौ निर्दिष्टाः सन्ति। निपातसंज्ञामन्वर्थां मन्यमानो यास्को लिखति अथ निपाता: उच्चावचेषु अर्थेषु निपतन्ति[iv] इति । व्युत्पत्त्यानया निपातानाम् 'अनेकार्थाभिधानम् साधारणलक्षणं प्रतीयते। परञ्चास्य लक्षणस्य सत्त्वाभिधायि "हरि सैन्धव" प्रभृतिनामशब्देष्वप्यतिव्याप्तत्वात् महर्षि पाणिनिना निर्दुष्टमेतल्लक्षितं 'चादयोऽसत्त्वे'[v], 'प्रादयः'[vi]चादिप्रादिगणयोः परिगणिताः अद्रव्यार्थकाः शब्दा निपाता इति । द्रव्यार्थकानां तु चादिगणपठितत्वेऽपि न भवति निपातसंज्ञा तद्यथा चादिगणपठित: 'पशु' शब्द: लिङ्गसंख्याद्यन्वितः चतुष्पादजातिविशेषं बोधयेच्चेत् तर्हि निपातसंज्ञानर्हः, किन्तु लिङ्गसंख्याद्यनन्वितस्य विशेषणीभूतस्य सम्यगाद्यर्थस्य बोधकत्वे तु निपातसंज्ञार्ह एव । निपातादुपसर्गभेद एतावान् यथा धातुनामार्थयोः सम्बन्धसहाः प्रादिचादिगणपठिता: शब्दा निपाताः, धात्वर्थमात्रसंबन्धसहाः प्रादयस्तूपसर्गा इति।

एवञ्च निपातोपसर्गमध्ये व्याप्यव्यापकभावसंबन्धः सुस्थिरः । उभयोः गणयोः परिगणिताः उभयेऽपि शब्दा अद्रव्यार्थका इति वर्तते एकमेव साधारणं लक्षणम्। अन्यदपि अस्ति साम्यम्, तद्यथोभयोः सार्थकता, अनेकार्थकता, विरुद्धार्थकता, निरर्थकता इत्येतेषु समेषु अंशेषु।

उपसर्गसंज्ञाया अपि सार्थकत्वं तद्यथा व्युत्पत्तिः- उपसामीप्यसम्बन्धेन सृज्यते बोध्यतेऽनेनेति उपसर्गः प्राधान्येन शब्दसंरचना धातुगोचरा परं संरचनायामस्यामुपसर्गाणां नास्ति स्वल्पमपि सहकारित्वम् । गौणरूपेण

शब्दसर्जनायां सहकारिकारणीभूताः खल्वेते उपसर्गाः।संस्कृतव्याकरणे धातुः प्रधानसर्गसाधनमुपसर्गश्चापरम्। उपसर्गव्युत्पत्तिस्तूक्तरीत्या बहुधा सम्भवति। महर्षिपाणिनिना निरूपितं यच्च निपातोपसर्गयोः साधारणासाधारणं लक्षणं तदेव अभिनवैर्बुधैरङ्गीकृतम्।

अत्रेदमवधेयम्-क्रियोपसर्गयोः क्रियानामार्थनिपातयोर्वा सञ्जायमानः सम्भवत्सम्बन्धः अर्थद्वारकः"[vii]एव। स च विशेष्यविशेषणभावापत्ररूपः। सञ्जातेऽस्मिन् संयोगे अर्थपरिवर्तनं प्रायोऽवश्यम्भावि तदत्र प्रमाणम्

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**

**गङ्गासलिलमाधुर्यं सागरेण यथाम्भसा।।**[viii] इति।।

आचार्यचन्द्रकीर्तेः उक्तकारिकापेक्षया अर्थगौरवमवलोकनीयमधस्तनकारिकायामाचार्यभर्तृहरीणाम्। तद्यथा

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**

**प्रहाराहारसंहारविहारपरिहारवत्**"[ix] इति।।

एकेनैव धातुना निपातोपसर्गमहिम्ना नानाक्रियाबोधोऽवश्यम्भावी। सत्तार्थकाद् 'भू' धातोरेव प्रभवति, पराभवति, सम्भवति, अनुभवति, अभिभवति, उद्भवति, परिभवति, साक्षाद्भवति इत्यादिभिः मिश्रितरूपैर्विलक्षणार्थावगतिप्रसिद्धेः अर्थपरिवर्तनमतिरिच्य अनयोः अवान्तरप्रवृत्तयोऽपि परिलक्ष्यन्ते। उपसर्गो निपातो वा परतन्त्रः इत्येतत् कथनस्येदमाकूतं यथा पाणिनेः पूर्वं स्यान्नामैषां स्वतन्त्रतः प्रयोगोऽर्थाभिव्यक्तिर्वा, तद्यथा-" उत्तरः (उत्+तरप्), उत्तमः (उत्+तमप्), उद्वत् (उत्+वति), निवत् (नि+वति), प्रेष्ठः (प्र+इष्ठन्), श्रेष्ठः (श्र+इष्ठन्)" इत्येतेषु शब्देषु निपातोपसर्गाभ्यां स्वातन्त्र्येण प्रत्ययसम्प्रयोगोऽर्थसम्बन्धश्च दृक्पथमायाति। एतेषां पृथक् प्रयोगार्हत्वाभावे एभ्यः प्रत्ययसम्प्रयोगादयः न सम्भवेयुः। महर्षिगार्ग्येणापि एते स्वतन्त्रा एवमानिषत। परं महर्षिशाकटायनोपज्ञः सिद्धान्तः पाणिनिना एतावान् परिपुपुषे। यथा अर्वाचीनवैयाकरणैः एतेषां स्वतन्त्रसत्ता नाङ्गीकृता"[x] परतन्त्रत्वादेवैतेषां वाक्यादौ प्रयोगाभावः, सापेक्षस्थितिश्च। एषु षष्ठ्यादिविभक्तयोऽपि न संयुज्यन्ते, लिङ्गसंख्यादीनां योगोऽपि दुर्घटएव किञ्च निरर्थकरूपेणापि केवलं पादपूर्त्यर्थं दृश्यते एतेषां प्रयोगःतदुक्तं दुर्गाचार्यैः

**"क्रियावाचकमाख्यातमुप विशेषकृत्।**

**सत्त्वाभिधायकं नाम निपातः पादपूरणः।।**" ( दुर्गाचार्यवृत्तिः निरुक्तम् १-९)

निपातवत् उपसर्गोऽपि क्रियया सम्बद्ध एव प्रयुज्यते। वस्तुतः क्रियासंयोगादेव उपसर्गत्वमुपजायते। अत एव कतिपये वैयाकरणा आमनन्ति, क्रियातिरिक्ता स्थितिः उपसर्गाणां नास्तीति। उपसर्गसहितं धातोर्यद्रूपं तदेव वस्तुतः धातुस्वरूपम्। यच्च विवेचनशास्त्रेषु उपसर्गाणां तद् अपोद्धाररीत्या अडाड्द्विर्वचनादिव्याकरणनियमं निर्वोढुकामेन

अवादि । परमिदमेकदेशीयं मतम्, अन्यथा धातोः सोपसर्गत्वे उपसर्गादपि पूर्वमडाडाद्यागमः सञ्जायेत उपसर्गाणामपि द्वित्वंच स्यात्। अपि च 'संग्राम' धातौ'सम्' इत्येनम् उपसर्गं मत्वा सोपसर्गधातुवादोऽपि नोचितः, तस्य पतञ्जलिनापि नियमार्थत्वाङ्गीकारात् । आचार्यो भर्तृहरिः कैयटश्च तमपवादं मत्वा उपसर्गात्पूर्वमडाडादिविधानं कृतवान् । नागेशेन तु तत्रस्थः 'सम्' इति शब्दः उपसर्गसमानाकारः प्रोक्तः"[xi]"एतत् कथनस्याभिप्रायोऽयं क्रियोपसर्गयोवर्त्तते कश्चित् मिथ उपकारित्वरूपः सम्बन्धः । अत एव पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन इति वैयाकरणानां राद्धान्तः[xii] इदमेव सिद्धान्तिमतम्। कतिपये वैयाकरणाः "पूर्वं धातुः कारकेण युज्यते पश्चादुपसर्गेणेति व्याहरन्ति । तदयं तर्कस्तेषां साधनसम्बद्धैव क्रिया साध्यस्वरूपा, साधनमेव क्रियायाः निर्वर्तकम्। यावत् साधनेन न युज्येत क्रिया तावद् अनिष्पन्नैव। फलतः सा किमपि विशेषणं नाकाङ्क्षत | तस्मात् धातुः पूर्वं साधनेन सम्बन्धं संयोज्यैवोपसर्गेण सम्बध्यते"[xiii]

निपातोपसर्गयोः बहुविधाः प्रवृत्तयः शास्त्रेषूपवर्णिताः सन्ति। पाणिनिना अष्टाचत्वारिंशता सूत्रैः उपसर्गसंज्ञाप्रयुक्तानि षत्वणत्वप्रत्ययविधानादिकार्याणि निर्दिष्टानि । निपातसंज्ञा- प्रयुक्तकार्याण्यपि दीर्घप्रकृतिभावस्वरविधानादिनानाविधानि। तत्र वैदिकव्याकरणे निपातनिमित्तककार्याणामस्ति खल्वाधिक्यम् ।

अत्रेदमपि धार्यं यत्"षत्वे णत्वे च कर्तव्ये क्रियायुक्तत्वेऽपि प्रादिगणपठितस्य 'दुर्' इत्यस्य उपसर्गत्वं न जायते अन्तर्-शब्दस्य तु प्रादिगणपाठाभावेऽपि अङ्किविधिणत्वेषु उपसर्गसंज्ञा प्रवर्तते"।[xiv] अत एव 'अन्तर्धा' अन्तर्धिः, अन्तर्भवाणि' इत्येते शब्दा व्याकरणदृष्टिकोणेनापि साधवः सन्ति। एवमेव 'दुःस्थितिः, दुःस्थः, दुर्भवानि' इत्येतेषु शब्देषु उपसर्गनिमित्तके षत्वणत्वे च न भवतः ।

उपरिप्रोक्तेन सुस्पष्टमिदं यत् सार्थकत्वेऽपि निपातोपसर्गयोः नामाख्यातयोरिव विभक्त्यासंयोज्य कस्मिंश्चित् निश्चितेऽर्थे प्रयोगो न जायते। उक्तञ्च आकृत्यधिकरणवार्त्तिके

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः**

**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ।।**

**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।**

**तदर्थद्योतकौ तौ तु वाचकः स विचार्य्यते ।**[xv]इति

कुत्रचिदुपसर्गाः अर्थविषयसंदेहं निवारयन्ति,"[xvi]क्वचिच्च क्रियायाः अर्थान्तरं व्यञ्जन्ति, (पतति उत्पतति सीदति प्रसीदति) कुत्रचित् केवलं धात्वर्थमनुगच्छन्ति, (सूते प्रसूते आगच्छति अध्यागच्छति)कर्हिचित्तु ससाधनक्रियामभिदधति" (एते उपसर्गेभ्यो विधीयमानाः ससाधनायां क्रियायां भविष्यन्ति)। एवं नास्त्येषां कोऽपि नियतोऽर्थः । अत एव सर्व वैयाकरणा एतेषां कस्यचिदपि नियतार्थस्य वाचकत्वममत्वा विभिन्नासु दशासु अनेकेषां

**International Journal of Research in Social Sciences**
Vol.9 Issue 12, December 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

प्रतीयमानार्थानां द्योतकत्वमामनन्ति। अयमेव पन्थाः, अन्यथा एतेषामर्थस्य स्वतन्त्रवाचकत्वाङ्गीकारे प्रकर्षार्थे' केवलं 'प्र' इत्यस्य निश्चयार्थे च 'नि' मात्रस्य प्रयोगेण भाव्यम्। परन्तु कुत्रचिदपि निपातोपसर्गाणां स्वतन्त्ररूपेणार्थेषु न हि दृष्टिगतः प्रयोगः यत्र च 'अनुकः' अभिकः, अभीकः, विशालः, विशङ्कटम्, संकटम्, प्रकटम् उत्कटम्' इत्येतेषु परेषु स्वरूपेण उपसर्गात् प्रत्ययो विहितः, तत्रापि 'प्रतिलोमानुलोम' शब्दयोरिव साधुत्वमन्वाख्यातुं शास्त्रीयप्रक्रियानिर्वाहहेतुका केवलं व्युत्पत्तिः प्रदर्शिता"[xvii]। एभिरुदाहारणैर्भाषाविज्ञानस्य विद्यार्थी अनुमायात् चेत् यथा पाणिनेः पूर्वमेतेषां प्रादीनां स्वतन्त्ररूपेणार्थेषु प्रयोग आसीदिति तर्हि अत्रानुमाने नास्ति केषामपि नूनं विमतिः। परन्तु वार्तमानिके साहित्यिके प्रायोगिके वा संदर्भे एतेषां वाचकत्वं नानुमानसहम्। भाष्यकारस्य 'आङ् आभिमुख्ये वर्तते प्रशब्दः आदिकर्मणि, निरयं बहिर्भावे वर्तते' इत्यादि प्राद्यर्थकथनं तथा कविकुलगुरुकालिदासस्य आमनोर्वर्त्मनः परम् (रघुवंश 1-17) इत्येतस्मिन् पद्ये आङः स्वतन्त्रः प्रयोगश्चेति प्रादीनां वाचकत्वे न प्रमाणभूतौ प्रकरणादिना तात्पर्यभिन्नत्वात्। एते निपातोपसर्गाः सार्थकाः अनेकार्थका बहुधा कोशेषु परिगणिताः व्याख्याता नित्यमुक्तकण्ठेन स्वीकृताश्च, किन्तु एतेषु निर्दिष्टार्थेषु स्वातन्त्र्येणापृथक्प्रयोगार्हाः। 'आमनोः' इति कालिदासप्रोगेऽपि 'अन्वर्थापेक्षयैव आङः प्रयोगः।

वैयाकरणभूषणसारे कौण्डभट्टेन निपातार्थाख्ये प्रकरणे निपातोपसर्गयोः निष्कृष्य नानायुक्तिभिः द्योतकत्वपक्ष एव प्रतिष्ठापितः। नैयायिकास्तु अर्धजरतीयं 'प्रादयो द्योतकाः चादयो वाचकाः"[xviii]इति मतमालम्बन्ते, परमेतन्मतं तत्र निरस्य उभयोरपि द्योतकत्वं समानरूपेण सम्मानितम्। 'उपास्येते हरिहरौ', 'साक्षात्क्रियते शिवः इति उभयत्रापि वाक्ययोः उपासनासाक्षात्करणे न धात्वोः अर्थौ, अन्यथा 'आस्यते, क्रियते' इति आभ्यामपि क्रियापदाभ्यामुपासनासाक्षात्करणरूपार्थौ अभिधीयेताम्। एवमेव तौ अर्थौ निपातोपसर्गमात्रस्यापि न, धातोः प्रयोगवैयर्थ्यापत्तेः। यदि च धातूपसर्गयोः विशिष्टयोः- इति विशिष्टार्थपक्षाङ्गीकारः, तदा बहुविधानां विपत्तीनां बन्ध एव पुरस्तात् प्रस्तुतः, तद्यथा तस्मिन्नर्थे खण्डशः शक्तिः अखण्डा वा? स विशिष्टार्थः अप्रकृत्यर्थः प्रत्ययार्थसम्बन्धायोग्यः इत्येवं जातीयकप्रश्नेनोभयार्थपक्षोऽपि गौरवग्रस्तः। तस्मात् इदृशेषु स्थलेषु उपासनायां साक्षाद्करणादौ वार्थेषु धातोः लक्षणा अप्रसिद्धशक्तिद्वितीयनामभाक् स्वीक्रियते। तत्र निपातः उपसर्गो वा तात्पर्यं ग्राहयतः। अनयोस्तात्पर्यग्राहकत्वमेव द्योतनम्। तच्च उपसर्गप्रादीनामिव चादीनामपि समानमेव। 'चैत्रमिव पश्यति' इति वाक्येऽपि लक्षणया चैत्रपदमेव कर्मीभूतचैत्रप्रतियोगिकसादृश्यविशिष्टमर्थं बोधयति, 'इव' पदं तत्र तात्पर्यं ग्राहयतीति द्योतकमेव। नैयायिका अपि एतादृशस्थले पद्धतिमेनामङ्गीकुर्वन्ति। अत एव 'घटो नास्ति' इत्यादि स्थले घटपदं समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावे लाक्षणिकं नञ् पदं च तत्र तात्पर्यं ग्राहयद् द्योतक - मित्यभिधीयते। तस्मात् अन्वयसिद्धिहेतुकं द्योतकत्वमुभयेषां प्रादिचादीनां युक्तिसमीचेनमेव। एवञ्च उपासनासाक्षात्करणादीनामर्थानां धात्वर्थत्वाङ्गीकारेणैव कर्मणि लकारोपपत्तिः"[xix]। संग्रहकारमतेनापि उपसर्गाः द्योतका भवन्ति "शब्दान्तरोपग्रहमन्तरेण सम्भवति सन् अलब्धनियमयोऽर्थस्तद्द्योतको नियमयन् वाचकतामतिक्रामतीति संग्रहकार आह"[xx] इति। द्योतनादिविषये त्रिविधानि मतानि आचार्यभर्तृहरिणोल्लिखितानि-

**International Journal of Research in Social Sciences**
Vol.9 Issue 12, December 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

'वाचकत्वम्, द्योतकत्वम् सहाभिधायकत्वमित्युपसर्गेषु त्रिविधा प्रतिपत्तिराचार्याणाम्। तत्र अनभिहितार्थमध्यारोपयन् वाचक इति प्रतिज्ञायते। सम्भविनमर्थमनभिव्यक्तमभिव्यञ्जन् द्योतकइत्यभ्युपगम्यते।स्वभावतः प्राप्तनियतशक्तिमात्रमादधत् स्वार्थकवत् सहाभिधायी व्यवस्थाप्यते इति। द्योतकतापि आचार्यहरिणाद्विविधा प्रोक्ता(१) अनाविर्भूताविर्भावनम्। (२) सहाभिधानं चेति। तथाहि - द्योतनमपि द्विविधम् अनाविर्भूताविभावनम्, अव्युदासप्रसंगे वा प्रकारान्तरव्युदासेन कस्यचिदवधारणम्। तद्यया प्रतिष्ठते उत्पुच्छयते, अभिमनायते इति । तदपि प्रसिद्धाप्रसिद्धावियुतप्रयोगाणाम्। 'उपासते, प्रपचति, अधीते, अध्येति इति यथा । सहाभिधानं वा । यावकः गोपायिता ब्राह्मणाधीनं जुगुप्सते"[xxi] इति ।

एतावता वक्तव्येन निपातोपसर्गयोः किञ्चिद् लक्षणद्योतनादिविषये विचार- प्रसारः समजनि अधुनास्मिन्त्रेव प्रसंगे गतिसंज्ञकत्वे किञ्चित् चर्च्यते। गतिसंज्ञेयं शास्त्रीयप्रक्रिया निर्वाहहेतुका । शब्दान्तरेण सह प्रादीनां जायमाने तत्पुरुषे समासे उदात्तादिविधौ च वर्ततेऽस्या विशिष्योपादानत्वम्। 'प्रभावः, विहसनम्, निर्याणम्, पराजयः, इत्यादिशब्देषु प्रादीनां गतित्वादेव कुगतिप्रादयः (पा. सू. 2-2-18) सूत्रेण समासः, ततः समासस्वरश्च विधीयते । शास्त्रीयनियमानुसारेण 'व्याघ्री' इत्यादिरूपसिद्धयेऽपि प्रादीनां गतिसंज्ञाविधानं, गतिसंज्ञकस्य सुबुत्पत्तेः पूर्वं समासविधानं चावश्यकम्[xxii] " अन्यथा सुबुत्पत्तेः प्राक् लिङ्गबोधक- टापोऽत्यावश्यकत्वेन 'व्याघ्रा' इत्यनिष्टरूपं सम्पद्येत।

प्रादीनां क्रियया सह अर्थद्वारके विशेष्यविशेषणभावसम्बन्धे संवृत्ते सति गतिसंज्ञा भवति । अस्यामेवावस्थायामुपसर्गसंज्ञापि सञ्जायते तथा एतेषां यदा प्रातिपदिकेन कारकेण वा तादृशः सम्बन्धः सम्भवति तदा केवलं तेषां निपातसंज्ञैव जायते। तद्यथा- "सुधीः, अधिहरि, अतिमालः, अधिसेचक" इत्यादिषु शब्देषु प्रादीनां केवलं निपातसंज्ञैव । तथा "प्रणेयः, प्रणयः, विनेयः विनयः" इत्यादिषु गत्युपसर्गनिपातरूपं संज्ञात्रयमपि सञ्जायते।

गतिशब्दो ज्ञानेऽपवर्गे वा वर्तते। वेदमन्त्राणामर्थज्ञाने उदात्तादिस्वराणां ज्ञानम्, उदात्तादि स्वरज्ञाने च गतिसंज्ञाया विद्यते महती उपकारिता । एवञ्च वेदार्थज्ञानेनापवर्ग-साधनीभूतत्वात् साधने साध्यधर्ममारोप्य गतिसंज्ञामन्वर्थं मामनन्ति । प्रादीनां यथा गत्युपसर्गनिपातसंज्ञा भवन्ति तथैव कर्मप्रवचनीयसंज्ञापि । कर्मप्रवचनीयसंज्ञेयं केवलमेकादशप्रादीनामेव कल्पते, एतेषां द्योत्या अर्थाश्च द्वाविंशतिः, तद्यथा प्रादयस्ते अनु, उप, अपि, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि चेति। एते च द्योत्यार्थाः विंशतिर्यथा "हेतुलक्षणम् सहार्थ हीनता, आधिक्यम्, वर्जनम्, मर्यादा- वचनम्, लक्षणम्, इत्थंभूताख्यानम्, भागः, वीप्सा, प्रतिनिधिः, प्रतिदानम्, आनर्थक्यम्, पूजा, अतिक्रमणम्, पदार्थः, सम्भावनम्, अन्ववसर्गः, गर्हा, समुच्चयः, स्वाम्यम्, अधिकारश्चेति ।

कर्मप्रवचनीयस्य येन कारकेण सम्बन्धः सञ्जायते तस्मिन् कारके द्वितीयापञ्चमीसप्तमीनां विभक्तीनां प्रयोगो भवति। गत्युपसर्गादिसंज्ञं प्रबाध्य संज्ञेयं प्रवर्तते। अतः जातायां कर्मप्रवचनीयसंज्ञायां गत्युपसर्गनिमित्तकानि षत्वणत्वस्वरादिकार्याणि न प्रभवन्ति। तद्यथा सुसिक्तम्, सुस्तुतम् इत्यादिषु उपसर्गनिमित्तं षत्वं तथा अध्यागच्छति,

**International Journal of Research in Social Sciences**
Vol.9 Issue 12, December 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

पर्यागच्छति इत्यादिषुगतिनिमित्तकः अनुदात्तश्च न भवतः । किञ्च उपसर्गवत् कर्मप्रवचनीयानां प्राक् प्रयोगनियमो ऽपि नास्ति, प्रत्युत येन कारकेण सम्बद्धाः तस्मात् परा एव प्रयुज्यन्ते यथा-जपमनु प्रावर्षत्, प्रद्युम्नः कृष्णात् प्रति इत्यादि ।

कर्मप्रवचनीयाः क्रियाजनितसम्बन्धविशेषं कारकस्य द्योतयन्तः क्रियाविशेषमभिव्यञ्जयन्ति। अतः कतिपये वैयाकरणा एतानुपसर्गेषु अन्तर्भाव्य पदानां चतुष्ट्वं स्वीकुर्वन्ति। एषां च मते उपसर्गकर्मप्रवचनीययोः अस्ति मौलिको भेदः । तेषां पदचतुष्ट्वं नोपपद्यते,कर्मप्रवचनीयस्य पञ्चमभेदाङ्गीकारात्। कर्मप्रवचनीयाः अतिक्रान्तक्रियावर्तिसम्बन्धं द्योतयन्ति,उपसर्गाश्च वर्तमानक्रियानिष्ठविशेषणं प्रकटयन्ति। अत्र वर्तमानपदस्य तात्पर्यं यथाक्रियाविशेषद्योतनद्वारा सम्बन्धनिर्धारणं क्रियागतविशेषद्योतनपूर्वकं हि सम्बद्धावच्छेदनमत्र वर्तमानम्"[xxiii] इति। अतिक्रान्तक्रियापदेन वाक्येऽप्रयुज्यमानक्रियाबोध्या।

तदिदमाकूतम्-सर्वविधोऽपि सम्बन्धः क्रियाकारकपूर्वक एव। कदाचित् क्रियासम्बन्धमुत्पाद्य विरमति, यथा- 'राजपुरुष:' इत्यादिषु । अयं हि राज्ञः पुरुषः, राज्ञा एतस्य पालनात् पोषणाच्च । इत्थं च पालनरूपा क्रिया आश्रयाश्रयिभावलक्षणं सम्बन्धमुत्पाद्य विरता जाता। कुत्रचित् च क्रियापदं श्रूयमाणं सत् सम्बन्धं व्यनक्ति यथा- "मातुः स्मरति" इत्यादौ स्मरणक्रिया श्रूयमाणा सती निमित्त निमितिभावलक्षणं सम्बन्धमुत्पादयति। यदा च क्रिया सम्बन्धमुत्पाद्य विरज्यते, तस्यां दशायां सन्दिग्धुं शक्यते, सम्बन्धः स क्रियाजनितो वा न वा? एतादृश्यां संशयापन्नावस्थायां कर्मप्रवचनीयानां महिमा। स खलु अश्रूयमाणक्रियायाः सम्बन्धविशेषं द्योतयति।

तद्यथा-हेलाराज:-

**'तदयमश्रुतक्रियाविषयसम्बन्धे कर्मप्रवचनीयानां महिमा**[xxiv]" इति।

क्रियाकृतसम्बन्धविशेषद्योतनादेव एते कर्मप्रवचनीयनामभाज:- अत एव "कर्म प्रोक्तवन्तः क्रियाकृतं विशेषसम्बन्धं द्योतयन्तीति कर्मप्रवचनीया उच्यन्ते"[xxv] इति कर्मप्रवचनीयशब्दे कर्मपदं क्रियाबोधकं तथा प्रपूर्वात् 'वच् परिभाषणे' इत्यस्माद्धातोः भूतकालिके कर्तरि 'अनीयर् प्रत्यययोगेन निष्पन्नः 'प्रवचनीय' शब्दः भूतकालिकं प्रवक्तारमभिधत्ते । एवञ्च कर्मप्रवचनीयशब्दः क्रियाया भूतकालिके प्रवक्तरि रूढः। यश्च अतीतकालिका क्रियां बोधयित्वा साम्प्रतं तस्याः सम्बन्धमात्रं प्रकटयति, स प्रादिशब्दविशेषः कर्मप्रवचनीयः । इत्थं च अन्वर्थेयं संज्ञा ।

तदुक्तं भर्तृहरिणा

**"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः**

**नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः"**[xxvi]इति ।।

व्यवच्छेद्यव्यवच्छेदकभावेन कर्मप्रवचनीयलक्षणं कारिकयानया प्रतिपादितम्। 'अनुभवति, अभिभवति' इत्यादिषु यथा 'अनु-अभि' शब्दौ अनुभव-अभिभवादिक्रियां द्योतयतः तथा 'जपमनु प्रावर्षत्' इत्यादी प्रयुक्तः अनुशब्दः

क्रियां न द्योतयति। न वा अनुशब्दः सम्बन्धमात्रमभिधत्ते षष्ठ्यपवादभूतया द्वितीययैव सम्बन्धार्थबोधनोपपत्तेः। एवमेव कर्मप्रवचनीयः अश्रुतक्रियायाः आक्षेपकोऽपि न मन्तुं शक्यते । तथाहि येन शब्देन क्रिया आक्षिप्यते स कारकविभक्तौ प्रयोजको भवति यथा- प्रादेशं विपरिलिखति' इत्यादौ'वि' शब्दः मानक्रियामाक्षिपति, 'प्रादेशं विमाय परिलिखति' इत्यर्थस्य तेन भानात्। एवञ्च विमानक्रियया प्रादेशरूपकर्मणः आक्षेपः, अतः 'प्रादेश' पदे द्वितीया निर्बाधा। कर्मप्रवचनीयेनापि अश्रूयमाणक्रियापदम् आक्षिप्येत चेत् तद्योगेऽपि कारकविभक्त्यैव भाव्यम्। फलतः 'कर्मप्रवचनीययुक्ते द्वितीया' (पा. सू. २-३-८) सूत्रमेव व्यर्थं स्यात् पुनश्च 'जपमनुप्रावर्षत्' इत्यादौ आक्षेपसम्भवोऽपि नास्ति । क्रियाकारकयोरेव मिथः आक्षेपः सम्भवति यथा-'प्रविश पिण्डीम् इत्यादिषु । प्रकृते 'जपम्' इत्यत्र सम्बन्धविवक्षायां शैषिकीया विभक्तिः, अतः तत्राक्षेपोऽसम्भवी । अत्र खलु 'निशामयति' क्रियाया अप्रयोगेऽपि जपप्रवर्षणयोः हेतुहेतुमद्भावः सम्बन्धः 'अनुना' द्योत्यते । अयमभिप्रायः:- कर्मप्रवचनीयप्रयोगेण सहैव क्रियाजनितसम्बन्धः प्रतीयते । स च सम्बन्धः पदान्तरेण सम्यग् अभिव्यङ्क्तुं न शक्यते, तेषां शक्तेः नियतसामर्थ्यात् । अतः पदान्तराणि स्वाभाविकमेव नियतार्थमभिव्यज्य विरज्यन्ते । एवञ्च सम्बन्धाभिव्यञ्जकानामितरेषां विरहात् उपस्थितत्वात् कर्मप्रवचनीय एव क्रियाजनितस्य तादृशसम्बन्धस्य द्योतकत्वेनोररीक्रियते ।

'जपमनु प्रावर्षत्' इत्यादौ अनोः कर्मप्रवचनीयतामवबोद्धुमिदमवधेयं यत् पूर्वोक्तं वाक्यम् 'जपमनु निशम्य प्रावर्षत्' इत्येतद्वाक्यस्थानापन्नम् । अस्मिन् मूलवाक्ये 'अनुः ' निशमनक्रियां विशिनषन् 'निशमनानन्तरं वृष्टः' इत्यर्थं बोधयँश्च प्रकारान्तरेण जपस्य कारणत्वं वर्षाणां च कार्यत्वमिति कार्यकारणभावमपि द्योतयति। परन्तु यदा अनेन वाक्येन कार्यकारणभावमात्रं विवक्ष्यते, प्रत्युत, निशमनानन्तरं वृष्टः' इत्यर्थो न विवक्ष्यते, तदा केवलमनोः कर्मप्रवचनीयस्यैव प्रयोगः तत्र वाक्ये क्रियते, 'निशम्येति' क्रिया लुप्ता अप्रयुक्ता वा भवति। एवञ्च 'जपमनु प्रावर्षत्' इत्यत्र वाक्ये प्रयुक्तः 'अनुः' भूतकाले निशम्येति क्रियां द्योतित्वा साम्प्रतं तज्जनितकार्यकारणभावैकद्योतकः सन् कर्मप्रवचनीयतां लभते।

कर्मप्रवचनीयस्य सम्बन्धद्योतनमपि द्विविधम्- (१) सम्बन्धविशेषद्योतनम् (२) क्रियाविशेषजनितत्वप्रकारकसम्बन्धविशेषद्योतनं चेति । तत्र प्रथमविधायां सम्बन्धविशेषपर्यालोचनेन पश्चात् क्रियाविशेषजनितत्वप्रतीतिरिति द्वितीयविधायां तु कर्मप्रवचनीयपदमेव सम्बन्धविशेषबोधेन सहैव क्रियाविशेषजनितत्वप्रतीतिमपि कारयतीति उभयत्र भेदो निर्वहणीयः तत्रैतयोः विधयोः द्वितीयविधायां कृतादराः आचार्याः भर्तृहरयः"वस्तुतः क्रियाफलस्यैव सम्बन्धस्य प्रकाशनात्। यथा तु भगवद्भर्तृहरेः तत्र अभिप्रायो लक्ष्यते यत् तथा निमित्तविशेषावच्छेद एव कर्मप्रवचनीयकृत इति राद्धान्तः"[xxvii] एभिराचार्यैः संग्रहकारस्य व्याडेरप्यभिमतमुदलेखि। "तद्यथा द्विविधो हि सम्बन्धः संग्रहे पठ्यते तिरोभूतक्रियापदः सन्निहितक्रियापदश्च तथैव केचित् पञ्चपदजातानि नामाख्यातोपसर्गनिपातकर्मप्रवचनीया इति पठन्ति तेषामप्यर्थभेदेनोपसर्गनिपातेभ्यः उत्कर्षः क्रियते, अत्र आह-क्रिया रूपनाशेन तिरोभवन्तीयं सम्बन्धमुपजनयति, तस्या निमित्तभूतायाः क्रियायाः सहचारीवाक्यान्तरेषु विशेषदृष्टसामर्थ्यः

International Journal of Research in Social Sciences
Vol.9 Issue 12, December 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

कर्मप्रवचनीयः क्रियाविशेषोपादानेन सम्बन्धमवच्छिनत्ति निमित्तानुग्रहानुगममात्रायाः सम्बन्धरूपं नियमयतीति इति[xxviii] ।

एतावता वाक्प्रबन्धनेन व्याकरणनिकाये पाणिनीयभित्तिपरम्परायां द्वाविंशतिसंख्याकानां प्रादीनां या संज्ञाचतुष्टयी निर्दिष्टा वर्तते तामेव चतुर्विधां संज्ञां किञ्चित् प्रस्तावितम्।

[i]महाभाष्यम् पस्पशाह्निकम् पृष्ठ ३
[ii]वाक्यपदीयम् 2.198
[iii]सिद्धान्तकौमुदी परिशिष्टं पृष्ठम् - 642
[iv]निरुक्त 1-4 पृष्ठम् - 65
[v]पा.सू. 1-4-57
[vi]पा.सू. 1-4-58
[vii]न्यासः 1-3-18
[viii]माध्यमिककारिकाटीका पृष्ठ 5
[ix]सिद्धान्तकौमुदी उत्तरार्ध पृष्ठ 47
[x]ध्वन्यालोकलोचनटीका पृष्ठ 354
[xi]महाभाष्यप्रदीपोद्योत 3-1-12
[xii]महाभाष्यं 8-1-70
[xiii]वाक्यपदीय हरिवृत्ति 2184
[xiv]सिद्धान्तकौमुदी भाग 3 पृष्ठ 52-53
[xv]वैयाकरणभूषणसार, निपातार्थ पृष्ठ - 377
[xvi]महाभाष्य 3-1-12
[xvii]महाभाष्यप्रदीप 5-2-68
[xviii]वैयाकरणभूषरसार पृष्ठ 365
[xix]वैयाकरणभूषणसार निपातार्थनिर्णय 42-43
[xx]वाक्यपदीय हरिवृत्ति 2989
[xxi]वाक्यपदीय हरिवृत्ति 210
[xxii]वैयाकरणसिद्धान्तकौमुदी भाग 2 पृष्ठ 544
[xxiii]वाक्यपदीय जातिसमुद्देश 1
[xxiv]वाक्यपदीय साधनसमुद्देश 3
[xxv]वाक्यपदीय पुण्यराज 2-201
[xxvi]वाक्यपदीय 2-206
[xxvii]वाक्यपदीय हेलाराज 31
[xxviii]वाक्यपदीय 2-201